नेपाल सरकार

शिक्षक सेवा आयोग

माध्यमिक तहको खुला प्रतियोगितात्मक परीक्षाको विषयगत पाठयक्रम २०७८-

**माध्यमिकस्तरः (शुक्लयजुर्वेदः)**

विषयः - शुक्लयजुर्वेदः पूर्णाङ्काः- १०० समयः- घण्टात्रयम्

**खण्डः- क**

**१. विद्यालयशिक्षायामाध्यमिकस्तरस्य शुक्लयजुर्वेदविषयकपाठ्यक्रमाध्ययनम्**

१.१ सर्वकारनिर्धारितशिक्षानीतिषु संस्कृतशिक्षा, राष्ट्रियपाठ्यक्रमप्रारूप २०७६ इत्याख्ये संस्कृतम्

१.२. विद्यालयशिक्षायाः पाठ्यक्रमः, पाठ्यक्रमनिर्माणविधिश्च

१.३. विद्यालयशिक्षायाः पाठ्यक्रमेषु शुक्लयजुर्वेदः, अस्य वैशिष्ट्यम्, शुक्लयजुर्वेदविषयक-पाठ्यक्रमस्य संरचनागतमध्ययनञ्च ।

१.४. पाठ्यक्रमपाठ्यपुस्तकयोः परिचयः, अन्तःसम्बन्धः, प्रयोगावस्था च ।

१.५. सम्प्रतिप्रचलितस्य पाठ्यक्रमस्य मूल्याङ्कनम् ।

**२. शिक्षणम्**

२.१.शिक्षणस्य परिचयः, सिद्धान्ताश्च ।

२.२. शिक्षणे बालमनोविज्ञानस्यशिक्षामनोविज्ञानस्य च महत्त्वम् ।

२.३. शैक्षणिकसामग्रीणां निर्मितिः, प्रयोगश्च ।

२.४. शिक्षणप्रक्रियायां श्रव्यदृश्यसामग्रीणां प्रयोगः, सूचनाप्रविधेरुपयोगश्च ।

२.५. विद्यार्थिमूल्याङ्कनमुपचारात्मकं शिक्षणञ्च ।

**३. शुक्लयजुर्वेदशिक्षणं मूल्याङ्कनञ्च**

३.१. शुक्लयजुर्वेदशिक्षणस्य परिचयः, महत्त्वञ्च ।

३.२. शुक्लयजुर्वेदशिक्षणे प्रचलिता पद्धतयः ।

३.३. शुक्लयजुर्वेदशिक्षणे समलम्बनीयाः क्रियाकलापाः, तेषां प्रयोगश्च ।

३.४. शुक्लयजुर्वेदशिक्षणे शिक्षणयोजनानिर्माणम्, शैक्षणिकसामग्रीणामुपयोगश्च ।

३.५. शुक्लयजुर्वेदशिक्षणस्य मूल्याङ्कनपद्धतयः, साधनानि च ।

**४. वैदिकस्वरूपं मण्डपकुण्डज्ञानञ्च**

४.१. ऋग्यजुःसामाथर्ववेदपरिचयः

४.२.संहिताब्राह्मणारण्यकोपनिषद्-वेदाङ्गानां स्वरूपबोधः ।

४.३. वेदाध्ययनपरम्परा, स्वशाखाध्ययनस्य महत्त्वम् ।

४.४. गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तिस्त्रिष्टुब्जगतीनां वैदिकच्छन्दसां लक्षणोदाहरणानि ।

४.५.पृथ्वीपरीक्षा-पूर्वाद्यष्टदिक्साधन-कुण्डपरिमाण-मण्डपकुण्डप्रकारज्ञानम् ।

**५. शुक्लयजुर्वेदशिक्षणम्**

५.१.शुक्लयजुर्वेदीयमाध्यन्दिनसंहिताया अग्न्यन्वाधानाग्निहोत्रहोमचातुर्मास्यमन्त्राणां (तृतीयाध्यायस्था) सस्वरमुच्चारणम् ।

५.२. शतरुद्रीय-वसोर्धारा-स्वस्तिवाचन(अध्याय-२५)-पुरुषसूक्त-सूर्यसूक्त-शान्तिपाठ-ईशोपनिषद्-गतमन्त्राणां सस्वरमुट्टङ्कनम् ।

५.३. सम्प्रदायगतानां स्वरवर्णोच्चारणनियमानामवबोधः ।

५.४. उदात्तादिस्वराः, सप्तस्वराः, मात्राबोधः, वर्णज्ञानञ्च ।

५.५. हस्तचालनप्रक्रिया, वेदाध्ययनविधिश्च ।

## खण्डः ख

**६. श्रौतस्मार्तयज्ञपरिचयः**

६.१. अधोऽङ्कितविषयाणां कात्यायनश्रौतसूत्रपरिभाषाप्रकरणदिशा परिज्ञानम्-
कर्मणां फलवत्वम्, अधिकारिनिरूपणम्, ऋत्विगधिकारः, यज्ञपात्रलक्षणम्, काम्यप्रतिनिधिविधानम्, काण्डानुसमयः, पदार्थानुसमयः ।

६.२. अधोऽङ्कितविषयाणां कात्यायनश्रौतसूत्रदिशा परिज्ञानम्-
अग्न्यन्वाधानम्, २-१(२-६) ब्रह्मवरणम्, २-१(१८-१९) पात्रासादनप्रकारः २-३(६-९) प्रयाजानुष्ठानम् ३-२(१६-२४) प्रधानयागानुष्ठानम् ३-३(२०-२९), दर्शपूर्णमासे द्रव्यदेवते च, चातुर्मास्ययागः, सोमयागपरिचयश्चेति विषयाः सरलाभूमिकातः परिज्ञेयाः ।

६.३. अधोऽङ्कितविषयाणां पारस्करगृह्यसूत्रदिशा परिज्ञानम्-
पञ्चमहायज्ञाः, नवान्नप्राशनम्, पाकयज्ञाः, अन्त्येष्टिः ।

६.४.प्रकृतिविकृतिपाठपरिचयः

६.५. माध्यन्दिनशतपथब्राह्मणस्यादितः पञ्चब्राह्मणानामुच्चारणम् ।

**७.पारिषदशास्त्रं स्वरवैदिकप्रक्रिया च**

७.१. स्वरसंस्कारमहिमा, शब्दोत्पत्तिचिन्तनम्, वेदाध्ययननियमाः, त्रैस्वर्योत्पत्तिः, ब्राह्मणस्वरः, संज्ञापरिभाषा, उदात्तानुदात्तस्वरितस्वरभेदाः (वाजसनेयप्रातिशाख्यस्य प्रथमाध्यायः)

७.२. पदपाठे इतिकरणनियमाः (वा.प्रा.४.१८-२४), संक्रमनियमाः (वा.प्रा.४.१६८-१८१)

७.३. क्रमपाठनियमा (वा.प्रा. ४.१८२-१९७)

७.४. सिद्धान्तकौमुद्या वैदिकप्रक्रियायाः निम्नसूत्राणि सोदाहरणं कार्याणि च-
छन्दसि पुनर्वस्वोः,छन्दसि परेऽपि, व्यवहिताश्च,छन्दसि बहुलम्, तृतीया चहोश्छन्दसि, मन्त्रे घसह्वरणश.,जनसनखनक्रम.., लिङर्थे लेट्, सिप् बहुलं लेटि, लेटोऽडाटौ, रात्रेश्चाजसौ, हृग्रहोर्भश्छन्दसि, व्यत्ययो बहुलम् ।

७.५.स्वरप्रक्रियाया उदात्तानुदात्तस्वरितस्वरनिरूपणम् ।

**८. मीमांसा-शुल्वसूत्रपदार्थबोधः**

८.१.मीमांसापदार्थः, श्रौतस्मार्तयज्ञनिरूपणे मीमांसाया आवश्यकता,

८.२. मीमांसाया द्वादशाध्यायगतविषयाः, धर्मलक्षणम् ।

८.३ विधिपरिचयः, अर्थवादपरिचयः, अदृष्टविषयः ।

८.४.प्रत्यक्षादिप्रमाणानि, श्रुत्यादिप्रमाणानि ।

८.५ शुल्वसूत्रविषयपरिचयः ।

**९.भाष्यम्**

९.१. भाष्यभूमिकापरिचयः ।

९.२. माध्यन्दिनसंहितायाः प्रथमाध्यायस्था महीधरोक्ता, आख्यायिकाः ।

९.३. शक्लयजुर्वेदमाध्यन्दिनशाखायाः निम्नाङ्कितमन्त्राणां महीधरानुसारमर्थज्ञानम् -

१) जिह्वामे भद्रम् (२०/६) २) पृष्टीर्मे राष्ट्रम् (२०/८) ३) यद्देवादेवहेडनम् (२०/१४)
४) यद्ग्रामे (२०/१७) ५) इन्द्रन्दुरः (२०/४०) ६) त्वामद्य ऋषे (२१/६१)
७) हिरण्यपाणिमूतये (२२/१०) ८) देवस्यचेततः (२२/११) ९) देवस्यसवितुः (२२/१४)
१०) आब्रह्मन् (२२/२२) ११) यथेमां वाचम् (२६/२) १२) उच्चाते जातम् (२६/१६)
१३) त्वामग्ने वृणते (२७/३) १४) केतुं कृण्वन् (२९/३७) १५) रथवाहणम् (२९/४४)
१६) ऋजीते (२९/४९) १७) आमूरज (२९/५७) १८) विश्वानिदेव (३०/३)

१९) तदेवाग्निः (३२/१) २०) याम्मेधाम् (३२/१४) २१) मेधाम्मे (३२/१५)

२२) इदम्मे (३२/१६) २३) अग्नेशर्द्धमहते (३३/१२) २४) इन्द्रवायू सुसन्दृशा (३३/८६)

२५) दिविपृष्टो अरोचताम् (३३/९२)२६) यज्जाग्रतो दूरम् (३४/१)२७) येनकर्म्माणि (३४/२)

२८) यत्प्रज्ञानम् (३४/३) २९) येनेदम्भूतम् (३४/४) ३०) यस्मिन्नृचः (३४/५)

३१) सुषारथिरश्वा (३४/६) ३२) भग एव भग. (३४/३८) ३३) अपेतो यन्तु (३५/१)

३४) कल्पन्तान्ते दिशः (३५/९) ३५) क्षत्रस्यत्वा (३८/१९) ३६)चतुःस्रक्तिर्नाभि (३८/२०)

३७) मनसः कामम् (३९/४) ३८) उग्रं लोहितेन (३९/९)

९.४.शतरुद्रीय-पुरुषसूक्त-सूर्यसूक्त-शान्तिपाठ-ईशोपनिषद्गतमन्त्राणां महीधरानुसारमर्थज्ञानम् ।

९.५.महीधर-उवट-दुर्गाचार्य- कर्क-हरिहर-अनन्तभाष्यवैशिष्ट्यम् ।

## १०. निरुक्तम्

१०.१. निघण्टुपदव्युत्पत्तिः, शब्दनित्यत्वानित्यत्वविचारः, भावविकारः, पदभेदानि ।

१०.२. धातुजसिद्धान्तः, निरुक्तस्य प्रयोजनानि, निर्वचनसिद्धान्तः, निरुक्तस्य पञ्चविधत्वम्, योग्यशिष्यनिरूपणम् ।।

१०.३. वैदिकशब्दकोशपठनम् - निघण्टुस्थानि पृथिवी-हिरण्य-रश्मि-रात्रि-वाङ्-नदी-कर्म-अपत्य-अन्न-धन-मनुष्याणां प्रत्येकं पञ्चनामानि,ज्वलति-क्रुध्यति-कान्ति-अत्तिकर्मणां प्रत्येकं पञ्चनामानि ।

१०.४. यास्कानुसारं वैदिकशब्दनिर्वचनम् -
पृथिवी-हिरण्य-रश्मि-रात्रि-वाङ्-नदी-कर्म-अपत्य-अन्न-धन-मनुष्यनामानि प्रत्येकं पञ्चनामानि, ज्वलति-क्रुध्यति-कान्ति-अत्तिकर्माणि च ।

१०.५. दैवतकाण्डपरिचयः ।

**द्रष्टव्यविषयाः-**

- पाठ्यक्रमोऽयं कखखण्डयोर्विभक्तोऽस्ति ।
- सामान्यतया कखण्डतः प्रष्टव्याः प्रश्नाः शिक्षणविधिसम्बद्धा भवन्ति ।
- खखण्डतः प्रष्टव्याः प्रश्नाः संज्ञानात्मका भवन्ति ।
- कखयोः द्वयोः खण्डयोः कृते पृथक्पृथक् अभ्यासपुस्तिका आवश्यकी भवति ।
- लिखितपरीक्षाया माध्यमभाषा संस्कृतं भवति ।
- पाठ्यक्रमोऽयं.२०७८/०६/०६ दिनङ्काद्. कार्यान्वितो भवति ।

| **प्रकरणम्** | **विषयाः** | **प्रश्नानि** | **अङ्काः** |
|---|---|---|---|
| | **खण्डः क** | **५** | **५०** |
| १ | विद्यालयशिक्षायामाध्यमिकस्तरस्य शुक्लयजुर्वेदविषयकपाठ्यक्रमाध्ययनम् | १ | १० |
| २ | शिक्षणम् | १ | १० |
| ३ | शुक्लयजुर्वेदशिक्षणं मूल्याङ्कनञ्च | १ | १० |
| ४. | वैदिकस्वरूपं मण्डपकुण्डज्ञानञ्च | १ | १० |
| ५. | शुक्लयजुर्वेदशिक्षणम् | १ | १० |
| | **खण्डः ख** | **५** | **५०** |
| ६ | श्रौतस्मार्तयज्ञपरिचयः | १ | १० |
| ७ | पारिषदशास्त्रं स्वरवैदिकप्रक्रिया च | १ | १० |
| ८ | मीमांसा-शुल्वसूत्रपदार्थबोधः | १ | १० |
| ९ | भाष्यम् | १ | १० |
| १० | निरुक्तम् | १ | १० |
| | **कुलयोगः** | **१०** | **१००** |

**सरूपप्रश्नपत्रम्**

विषयः - शुक्लयजुर्वेदः　　　　पूर्णाङ्काः- १००　　　　समयः- घण्टात्रयम्

**सर्वे प्रश्नाः समाधेयाः ।**

**खण्डः क**　　　　**५x१०=५०**

१. विद्यालयस्तरीयपाठ्यक्रमेषु शुक्लयजुर्वेदविषयकपाठ्यक्रमस्य स्वरूपं निर्धार्य तस्य संरचनागतवैशिष्ट्यमुट्टङ्कयत ।

२. शुक्लयजुर्वेदविषयशिक्षणस्य सामग्र्यः काः ?उपचारात्मकं शिक्षणमिति कथनेन किं ज्ञायते ?

३. शिक्षणोपलब्धौ शुक्लयजुर्वेदविषयकपाठ्यक्रमसाधारणोद्देश्यानि कानि ? तत्परिपूर्त्यै अवलम्बनीयान् शिक्षणविधीन् समुल्लिखत ।

४. **छन्दः पादौ तु वेदस्य** इतिश्लोकप्रतिपाद्यं प्रदर्श्य स्वशाखाध्ययनस्य महत्त्वमुपस्थापयत ।

*अथवा*

वेदाध्ययनरम्परां यथाशास्त्रं विलिख्य गायत्रीच्छन्दसः सोदाहणं लक्षणं लिखत ।.

५.सुसमिद्धाय, अवभृथनिचुम्पुण, मानोमहान्तम् इतिमन्त्रप्रतीकत्रयं प्रपूर्य हस्तचालनप्रक्रियां प्रदर्शयत ।

**खण्डः ख**　　　　**५x१०=५०**

६. माध्यन्दिनशतपथब्राह्मणस्य किमप्येकं ब्राह्मणं **आनो भद्रा** इतिमन्त्रञ्चोट्टङ्क्य चातुर्मास्ययागपरिचयमुपस्थापयत ।

*अथवा*

प्रकतिविकृतिपाठानां सोदाहरणं परिचयं जटापाठस्वरूपञ्च यथाशास्त्रं लिखत ।

७. प्रातिशाख्यदिशा शब्दः कथमुत्पद्यते ? त्रैस्वर्य-ब्राह्मणस्वरपरिचयश्च कः ? समाधाय **छन्दसि बहुलम्** इति सूत्रार्थञ्च निर्धारयत ।

८. श्रुत्यादिप्रमाणानि कानि ? तेषां श्रौतस्मार्तयज्ञनिर्धारणे कीदृशी भूमिका ? इति समाधाय **मन्त्रोच्चारणे अदृष्टोत्पत्तिः** इति विषयं निरूपयत ।

९. वेदार्थकरणे भाष्यभूमिकाया महत्त्वं शम्याहननकथाञ्चोपस्थाप्य यथेमां वाचम्, कुर्वन्नेवेह कर्माणि इति मन्त्रद्वयस्यार्थं महीधरदिशा प्रकटयत ।

१०. हिरण्य-रश्मिवाचकानि प्रत्येकं पञ्चनामानि विलिख्य यास्कानुसारं मनुष्य-धन-हिरण्यशब्दानां निर्वचनं कुरुत ।

समाप्तम्